# Munibhih Kritam Kurma Stotram

# મુનિભિઃ કૃતં કૂર્મસ્તોત્રમ્

## Document Information

Text title : Munibhih Kritam Kurma Stotram

File name : munibhiHkRRitaMkUrmastotram.itx

Category : vishhnu, stotra, dashAvatAra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : from Kurmapurana, kUrmapurANe uttarabhAge 46/53-66

Latest update : August 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2022

*sanskritdocuments.org*

Munibhih Kritam Kurma Stotram

# મુનિભિઃ કૃતં કૂર્મસ્તોત્રમ્

સૂત ઉવાચ ।
એતાવદુક્ત્વા ભગવાન્ વિરરામ જનાર્દનઃ ।
તુષ્ટુવુર્મુનયો વિષ્ણું શક્રેણ સહ માધવમ્ ॥ ૧॥

મુનયઃ ઊચુઃ ।
નમસ્તે કૂર્મરૂપાય વિષ્ણવે પરમાત્મને ।
નારાયણાય વિશ્વાય વાસુદેવાય તે નમઃ ॥ ૨॥

નમો નમસ્તે કૃષ્ણાય ગોવિન્દાય નમો નમઃ ।
માધવાય નમસ્તુભ્યં નમો યજ્ઞેશ્વરાય ચ ॥ ૩॥

સહસ્રશિરસે તુભ્યં સહસ્રાક્ષાય તે નમઃ ।
નમઃ સહસ્રહસ્તાય સહસ્રચરણાય ચ ॥ ૪॥

ૐ નમો જ્ઞાનરૂપાય પરમાત્મસ્વરૂપિણે ।
આનન્દાય નમસ્તુભ્યં માયાતીતાય તે નમઃ ॥ ૫॥

નમો ગૂઢશરીરાય નિર્ગુણાય નમોઽસ્તુ તે ।
પુરુષાય પુરાણાય સત્તામાત્રસ્વરૂપિણે ॥ ૬॥

નમઃ સાઙ્ખ્યાય યોગાય કેવલાય નમોઽસ્તુ તે ।
ધર્મજ્ઞાનાધિગમ્યાય નિષ્કલાય નમોઽસ્તુ તે ॥ ૭॥

નમસ્તે વ્યોમરૂપાય મહાયોગેશ્વરાય ચ ।
પરાવરાણાં પ્રભવે વેદવેદ્યાય તે નમઃ ॥ ૮॥

નમો બુદ્ધાય શુદ્ધાય નમો યુક્તાય હેતવે ।
નમો નમો નમસ્તુભ્યં માયિને વેધસે નમઃ ॥ ૯॥

નમોઽસ્તુ તે વરાહાય નારસિંહાય તે નમઃ ।
વામનાય નમસ્તુભ્યં હૃષીકેશાય તે નમઃ ॥ ૧૦॥

સ્વર્ગાપવર્ગદાત્રે ચ નમોઽપ્રતિહતાત્મને ।
નમો યોગાધિગમ્યાય યોગિને યોગદાયિને ॥ ૧૧॥

દેવાનાં પતયે તુભ્યં દેવાર્ત્તિશમનાય તે ।
ભગવંસ્ત્વત્પ્રસાદેન સર્વસંસારનાશનમ્ ॥ ૧૨॥

અસ્માભિર્વિદિતં જ્ઞાનં યજ્જ્ઞાત્વામૃતમશ્નુતે ।
શ્રુતાસ્તુ વિવિધા ધર્મા વંશા મન્વન્તરાણિ ચ ॥ ૧૩॥

સર્ગશ્ચ પ્રતિસર્ગશ્ચ બ્રહ્માણ્ડસ્યાસ્ય વિસ્તરઃ ।
ત્વં હિ સર્વજગત્સાક્ષી વિશ્વો નારાયણઃ પરઃ ॥ ૧૪॥

ત્રાતુમર્હસ્યનન્તાત્મા ત્વામેવ શરણં ગતાઃ ।

ઇતિ કૂર્મપુરાણે ઉત્તરભાગે ષટ્ચત્વારિંશાધ્યાયાન્તર્ગતં
મુનિભિઃ કૃતં કૂર્મસ્તોત્રં સમાપ્તમ્ ।
કૂર્મપુરાણે ઉત્તરભાગે ૪૬/૫૩-૬૬

Proofread by PSA Easwaran

---

*Munibhih Kritam Kurma Stotram*

pdf was typeset on August 13, 2022

Please send corrections to *sanskrit@cheerful.com*